Chapter-7

SMT. HANSA MEHTA LIBRARY • The M. S. University of Baroda

# सप्तमं प्रकरणम्

## १.७.० वसिष्ठसंहितायाः संहितान्तरैः साकं तुलना

वसिष्ठसंहितायास्तुलना बृहत्संहिता–नारदसंहिता–भद्रबाहुसंहितानां साकम् –

### १.७.१ विषयाणां साम्यवैधर्म्यम्-

वसिष्ठसंहिताग्रन्थे ४६ अध्यायाः सन्ति। तत्र सूर्यादिचाराः ९ अध्यायेषु बृहत्संहिता-नारदसंहिताभद्रबाहुसंहिताग्रन्थेषु वर्णिताः सन्ति। प्रतिसूर्यलक्षणविषये वसिष्ठसंहिताग्रन्थे केवलं १ श्लोको वर्तते किन्तु बृहत्संहिताग्रन्थ एकः स्वतन्त्रोऽध्यायो वर्तते। वर्षेशादिनिर्णयफलाध्याय- विषयो नारदसंहिताग्रन्थे वर्णितः। पञ्चाङ्गाध्यायप्रकरणे तिथि-वार–नक्षत्र–योग–करणानां विषया नारदसंहिताग्रन्थे वर्णिताः। तिथि–नक्षत्र–करणानां विषया बृहत्संहिताग्रन्थे संक्षेपेण वर्णिताः। योगवारयोर्विषये कोऽप्युल्लेखो नास्ति। तथा नक्षत्रजातकाध्यायेऽश्विन्यादिसप्तविंशति- नक्षत्रेषूत्पन्नजातकस्य शुभाशुभफलं वर्णितम्। गोचरविचारस्तथा संक्रान्तिविषयो नारदसंहिताग्रन्थे वर्णितः। किन्तु बृहत्संहिताग्रन्थे तथा भद्रबाहुसंहिताग्रन्थेऽस्य कोऽप्युल्लेखो नास्ति। संस्कारप्रकरण आधानाध्याय-पुंसवन-सीमन्त- जातकर्म- नामकर्म- अन्नप्राशन- चौल- उपनयन- समावर्तन- विवाहप्रश्न-विवाहाध्यायादि - विषया नारदसंहिताग्रन्थे वर्णिताः। मुहूर्तचिन्तामणिग्रन्थे षोडशसंस्कारप्रकरणे वसिष्ठस्य बहवः श्लोकाः प्राप्यन्ते। किन्तु बृहत्संहितायास्तथा भद्रबाहुसंहिताया नैव प्राप्यन्ते। उत्पातविषया बृहत्संहितायां नारदसंहितायां तथा च भद्रबाहुसंहितायां वर्णिताः सन्ति। यात्राविषयो नारदसंहितायां तथा भद्रबाहुसंहिताग्रन्थे वर्णितः। अश्वारिष्टगजारिष्टशान्तिविषयौ नारदसंहिताग्रन्थे वर्णितौ। बृहत्संहिताग्रन्थे अश्वलक्षण-गजलक्षणविषययोरुल्लेखोऽस्ति। वास्तुप्रकरणे वसिष्ठसंहिताग्रन्थे गृहप्रवेश–वास्तु-

सुरप्रतिष्ठाविषया विस्तृतरूपेण वर्णिताः सन्ति। बृहत्संहितायां तथा नारदसंहिताग्रन्थे वास्तु-सुरप्रतिष्ठाविषय उल्लेखोऽस्ति। बृहत्संहिताग्रन्थे प्रतिमालक्षणाध्यायस्तस्य विशेषः। वस्त्रपरिधानविषये बृहत्संहिताग्रन्थ उल्लेखोऽस्ति। एवंप्रकारेण वसिष्ठसंहितान्तर्गतानां ३४ अध्यायानां तुलना बृहत्संहिता, नारदसंहिता तथा भद्रबाहुसंहिताग्रन्थाधारेण वर्णितुं शक्यते।

### १.७.२ वसिष्ठसंहिताग्रन्थस्य वैशिष्ट्यम् -

विवाहाध्यायेऽष्टादशकूटानां विचारः, वास्त्वध्याये गृहनिर्माणे, ग्रामपुरादीनां निर्माणस्य विस्तृतं वर्णनं विहितम्। वर्षेशादिनिर्णयफलपरत्वे स्वतन्त्राध्याये विस्तृतं विवेचनं प्रस्तुतम्। पञ्चाङ्गप्रकरणे तिथिवारनक्षत्रयोगकरणानां विस्तृतं विवेचनं प्राप्यते। अश्वारिष्टगजारिष्टशान्तिविषयाः विस्तृतरूपेण विवेचिताः।

### १.७.३ ग्रहचाराध्यायाः----

**अर्कचाराध्यायः** - वसिष्ठसंहितायामर्कचारनामके द्वितीयाध्याये पञ्चविंशति (२५)श्लोकाः सम्मिलिताः। बृहत्संहितायामादित्यचारनामके तृतीयाध्याये चत्वारिंशत्(४०)श्लोकानां समावेशः। नारदसंहितायां रविचारनामके द्वितीयाध्याये सप्तविंशति (२७) श्लोकानां संग्रहः। भद्रबाहुसंहितायामादित्यचारनामके द्वाविंशत्यध्याय एकविंशति(२१)श्लोकानां संमेलनम्।

वसिष्ठसंहिताग्रन्थे मकरादिषड्राशिषु सूर्ये स्थित उत्तरायणं तथा च कर्कादिषड्राशिषु स्थितौ सूर्ये दक्षिणायनं कथ्यते, इति संक्षिप्तेनोक्तम्। बृहत्संहिताग्रन्थ उत्तरायणदक्षिणायनयोः परीक्षणार्थे उक्तं यत् सूर्यस्य दक्षिण उत्तरे वा यद्दिशि गमनं तदयने सूर्यः स्थित इति कथयेत्। अथवा महामण्डले छायाप्रवेश एवं निर्गमचिह्नाधारेणायननिर्णयो ज्ञातव्य इति बृहत्संहितायामुक्त्वा तस्य वैशिष्ट्यं प्रदर्शितम्। सूर्यसंक्रान्तिवशाद् ऋतुनिर्णयो वसिष्ठसंहितायां

कथितः, किन्तु बृहत्संहितायां तस्य नोल्लेखः। ऋतुनिर्णयकथनार्थे सूर्यमण्डलवर्णानुसारेण शुभाशुभफलं नारदसंहितायां कथितम्। वर्षादि–ऋतुकाले स्थितस्य सूर्यमण्डलस्य वर्णानुसारेण शुभाशुभफलं वसिष्ठसंहितामेवं बृहत्संहितायामपि कथितम्। तद् भद्रबाहुसंहितायां न कथितम्। प्रतिसूर्यलक्षणे वराहमिहिरेण स्वतन्त्राध्याये (अ. ३७ श्लोकसंख्या ३) विवेचितम्। यत् तस्य वैशिष्ट्यं प्रदर्शयति। नारदसंहितायामर्कचाराध्याये भूपतिः, सस्याधिपतिः, रसानामधिपस्तथा रसस्याधिपतिः– एतद् विषये संक्षेपेण कथितम्। वसिष्ठसंहितायां तेषां विषये स्वतन्त्राध्याये (अ. ११, श्लोकसंख्या १०) वर्षेशादिफलनिर्णयान्तर्गतस्तस्य विचारः प्रकटितः।

**चन्द्रचाराध्यायः** – वसिष्ठसंहितायां चन्द्रचारस्य तृतीयाध्याये द्वाविंशति (२२) श्लोकाः सम्मिलिताः। बृहत्संहितायां चतुर्थाध्याये द्वात्रिंशत् (३२) श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याये दश (१०) श्लोकाः सम्मिलिताः। तथा भद्रबाहुसंहितायां त्रयोविंशत्यध्यायेऽष्टपञ्चाशत् (५८) श्लोकाः सम्मिलिताः।

वसिष्ठसंहितायां चन्द्रशृङ्गाधारेण समर्घमहर्घविचारस्तस्य वैशिष्ट्यं च प्रदर्शितम्। बृहत्संहितायां दशविधसंस्थानेषु नवसंस्थानानां लक्षणफलानि च विवेचितानि– इति तस्य वैशिष्ट्यम्। भद्रबाहुसंहितायां प्रतिपदादिप्रत्येकतिथिषु दृश्यमानस्य चन्द्रस्य शुभाशुभफलं तथा चन्द्रस्य गोवीथ्यादि वीथिषु विचरतः शुभाशुभफलम्, एवं चन्द्रदृष्टि–अनुसारं यात्राविचार इति तस्य ग्रन्थस्य वैशिष्ट्यं दर्शयति। चन्द्रस्य शुक्ल–कृष्णनिर्णयो वसिष्ठसंहितायामेवं बृहत्संहितायां प्रदर्शितः। अश्विन्यादिनक्षत्रेषु स्थितचन्द्रशृङ्गाधारेण शुभाशुभफलं वसिष्ठसंहितायां कथितम्। बृहत्संहितायां चन्द्रस्याश्विन्यादिनक्षत्रेषु गमने शुभाशुभफलं कथितम्। तथा च नक्षत्रेषु गतस्य चन्द्रस्य शृङ्गस्य फलं नारदसंहितायां तथा भद्रबाहुसंहितायां कथितम्। चन्द्रशृङ्गस्य विविधाकारास्तथा मेषादिराशिषु स्थितस्य शुभाशुभफलं वसिष्ठसंहितायां

तथा नारदसंहितायां कथितम्। भौमादिग्रहैः खण्डितस्य चन्द्रशृङ्गस्य फलं तथा चन्द्रेण सह नक्षत्राणां संयोगो बृहत्संहितायां कथित इति तस्य वैशिष्ट्यम्।

**भौमचाराध्यायः** - भौमचाराध्याये वसिष्ठसंहितायां चतुर्थाध्याये पञ्चदश (१५) श्लोकाः सम्मिलिताः। बृहत्संहितायां षष्ठाध्याये द्वादश (१२) श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याये एकादश (११) श्लोकाः सम्मिलिताः। भद्रबाहुसंहितायां एकोनविंशत्यध्याय एकोनचत्वारिंशत् (३९) श्लोकाः सम्मिलिताः।

वसिष्ठसंहितायां तथा बृहत्संहितायां विविधनक्षत्रोदितस्य उष्णादिपञ्चविधसंज्ञकस्य भौमस्य फलं कथितम्। संचारवशनक्षत्रेषु स्थितस्य प्राप्तव्यफलानि च विवेचितानि। नारदसंहितायां नक्षत्रोदितस्य भौमस्य विशेषफलमुक्तम्। यथा - पूर्वाफाल्गुनी-उत्तराफाल्गुन्योर्नक्षत्रोदितो भौमो यद्युत्तराषाढानक्षत्रे वक्रत्वं गत्वा रोहिणीनक्षत्रेऽस्तङ्गतो भवेत्, तदा लोकत्रयविनाशकृत् स्यात्। श्रवणोदितो भौमः पुष्ये वक्री स्यात् तदा यद्दिक्ष्वभ्युदितस्तद्दिग्भूपहानिः स्यात्। भद्रबाहुसंहितायां भौमस्य प्रवासो, वर्णनं, दीप्तिः, काष्ठा, गतिः, फलं, वक्रानुवक्रनामानि विवेचितानि।

**बुधचाराध्यायः** - बुधाचाराध्याये वसिष्ठसंहितायां पञ्चमाध्याये सप्तदश(१७)श्लोकाः सम्मिलिताः। बृहत्संहितायां सप्तमाध्याये विंशति(२०)श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याये पञ्चदश(१५)श्लोकाः सम्मिलिताः। भद्रबाहुसंहितायामष्टादशाध्याये सप्तत्रिंशत्(३७)श्लोकाः सम्मिलिताः।

बुधस्योदयेऽश्विन्यादिनक्षत्रेषु स्थिते शुभाशुभफलं तथा बुधस्य सप्तगतयः, तासां नामानि, फलानि सर्वेषु ग्रन्थेषु विवेचितानि। बुधस्योदये जगति प्राप्तव्यं शुभाशुभफलं वसिष्ठसंहितायां नारदसंहितायां च कथितम्। मासवशाद् बुधस्य फलं बृहत्संहितायां तथा च कार्त्तिकादिमासेषूदितस्य बुधस्य फलं नारदसंहितायां कथितम्। भद्रबाहुसंहितायां बुधस्य

प्रवासः, अस्तः, उदयः, वर्णः, ग्रहयोगफलं वर्णितम्। बुधः सौम्यगत्यां समुत्थाय ४५ दिनपर्यन्तं दृश्येत्। विमिश्रगत्यां समुत्थाय ३० दिनपर्यन्तं, संक्षिप्तगत्यां समुत्थाय २४ दिनानि, तीक्ष्णायां १० रात्रौ, घोरायां षडाह्निकं, पापायां त्रिरात्रकं तथा च दुर्गायां ९ दिनपर्यन्तं दृश्येद् इति भद्रबाहुसंहितायां वैशिष्ट्यं प्रदर्शितम्।

**गुरुचाराध्यायः** – गुरुचाराध्याये वसिष्ठसंहितायां षष्ठाध्याय एकाधिकशतं(१०१) श्लोकाः सम्मिलिताः। बृहत्संहितायामष्टाध्याये त्रिपञ्चाशत् (५३) श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याये एकत्रिंशत्(३१)श्लोकाः सम्मिलिताः। तथा च भद्रबाहुसंहितायां सप्तदशाध्याये षट्चत्वारिंशत् (४६) श्लोकाः सम्मिलिताः।

गुरुचाराध्याये कृत्तिकादिनक्षत्रेषु स्थितस्य गुरोः क्रमेण कार्त्तिकादिमासानां निर्णयो वसिष्ठसंहितायां कथितः। तथा च तेषां फलविषये वसिष्ठसंहितायां बृहत्संहितायां तथा नारदसंहितायां वर्णितम्। वसिष्ठसंहितायां गुरोदयस्तस्य स्वरूपाधारेण शुभाशुभफलं कथितम्। प्रभवादिषष्ठिसंवत्सरानयनपद्धतिद्वारा संवत्सरनामानि फलानि च कथितानि। बृहत्संहितायां षठ्याब्दानयनं गाणितिकपद्धतिद्वारा साधयित्वा षष्ठिसंवत्सरानां युगा द्वादश सन्तीति निर्दिष्टम्। (पञ्चभिवर्षैः – १ युगम्, अतः १२ x ५ = ६० संवत्सराणि)। द्वादशयुगान्तर्गतानि संवत्सराणि तेषां नामानि फलानि च कथितानीति तस्य वैशिष्ट्यम्। मेषादिद्वादशराशिषु स्थितस्य गुरोः शुभाशुभफलं वसिष्ठसंहितायामेवं नारदसंहितायां कथितम्। गुरुर्यन्नक्षत्र उदितस्तन्नक्षत्रनामाधारेण संवत्सरनाम स्यात्। यथा – कृत्तिकारोहिणीनक्षत्रयोः गुरोः स्थितत्वेन मासस्तथा संवत्सरं कार्त्तिक इति नाम्ना ख्यातः। कार्त्तिकादिमासा द्वयोर्द्वयोर्नक्षत्रयोरन्तर्गतास्तत्र पञ्च, एकादश, अन्त्यमासाः त्रिषु त्रिषु नक्षत्रेष्वन्तर्गतः स्यादिति नारदसंहितायां तस्य वैशिष्ट्यम्।

**शुक्रचाराध्यायः** - शुक्रचाराध्याये वसिष्ठसंहितायां सप्तमाध्याय एकोनविंशति(१९)श्लोकाः सम्मिलिताः। बृहत्संहितायां नवमाध्याये पञ्चचत्वारिंशत्(४५)श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याय एकोनविंशति(१९) श्लोकाः सम्मिलिताः। तथा भद्रबाहुसंहितायां पञ्चदशाध्याये द्विशतएकत्रिंशंत्(२३१)श्लोकाः सम्मिलिताः।

शुक्राचारे शुक्रस्य नव(९)वीथिकाः, त्रयो (३) मार्गाः, तथा च षण् (६)मण्डलानि- इति वसिष्ठसंहितायां तथा नारदसंहितायामुक्तम् । तत्र वीथिकायां विचरतः शुक्रस्य फलं नारदसंहितायां, वसिष्ठसंहितायां तथा बृहत्संहितायां संक्षेपेण कथितम्। वसिष्ठसंहितायां शुक्रस्य स्वरूपवर्णनं तथा शुभाशुभफलवर्णनं कृतम्। शुक्रस्याग्रे स्थितानां सूर्यादिग्रहाणां फलं बृहत्संहितायां तस्य वैशिष्ट्यं दर्शयति। भद्रबाहुसंहितायां शुक्रचारविषयेऽतिविस्तारेण वर्णितम्। अथाध्याये कथितम्। भूतभविष्ये, वृष्टिरवृष्टी, जय-पराजये, धन-सम्पत्ती, अग्निप्रकोपः, रोगादिकं-एतेषां सर्वेषां शुक्रः सर्जकः। अध्याये रक्त-परुष-रोचन-ऊर्ध्व-चण्ड-तीक्ष्णनामानि शुक्रस्य षण्मण्डलानि भरणीनक्षत्रारम्भक्रमेण कथितानि। एतेषु मण्डलेषु स्थितस्य शुक्रस्य शुभाशुभफलं कथितम्। शुक्रस्य मार्गाः, शुक्रोदयास्तदिनानां कालः, शुक्रस्य नागवीथ्यादिवीथ्यां विचरतः समर्घ-महर्घविचारः, तथा शुक्रस्यातिचारफलं विवेचितमिति तस्य वैशिष्ट्यं प्रकटयति।

**शनिचाराध्यायः** - शनिचाराध्याये वसिष्ठसंहितायामष्टाध्याये षट् (६) श्लोकाः सम्मिलिताः। बृहत्संहितायां दशमाध्याये विंशति (२०) श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याये षट्(६) श्लोकाः सम्मिलिताः। तथा भद्रबाहुसंहितायां षोडशाध्याये द्वात्रिंशत् (३२) श्लोकाः सम्मिलिताः।

शनिचाराध्यायेऽश्विन्यादिनक्षत्रेषु तथा मेषादिराशिस्थितस्य शनेः शुभाशुभफलं वसिष्ठसंहितायां संक्षेपेणोक्तम्। यन्नारदसंहितायां विस्तृतरूपेण वर्णितम्। नारदसंहितायां शनेः पुरुषाकाराङ्गेऽश्विन्यादिनक्षत्राणां स्थापनम्, केवलमश्विन्यादिद्वादशनक्षत्रेषु विचरतः शुभाशुभफलं संक्षेपेण वर्णितम्। भद्रबाहुसंहितायां शनेरुदयास्तौ, वक्रत्वं, गतिस्तथा वर्णस्य शुभाशुभफलं कथितम्। एकस्मिन्वर्षे शनिः कति नक्षत्राणि भुङ्क्त इत्युक्त्वा तस्य फलं कथितम्। तथा च यदि एकस्मिन्वर्षे शनिश्चतुर्नक्षत्रेष्वतिक्रमणं करोति, तदा युगान्तो भवतीत्युक्त्वा तस्य वैशिष्ट्यं प्रदर्शितम्।अस्मिन्नध्याये शनिवेधेन प्राप्तं शुभाशुभफलमपि कथितम्।

**राहुचाराध्यायः** - राहुचाराध्याये वसिष्ठसंहितायां नवमाध्याये द्विषष्ठी (६२)श्लोकाः सम्मिलिताः। बृहत्संहितायां पञ्चमाध्यायेऽष्टनवति(९८)श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याये त्रयोदश(१३)श्लोकाः सम्मिलिताः। तथा भद्रबाहुसंहितायां विंशत्यध्याये त्रिषष्ठी (६३) श्लोकाः सम्मिलिताः।

राहुचाराध्याये, राहोरमरत्वविषये पौराणिकमतं कथितम्। तं ग्रहत्वं प्रदत्तमिति वसिष्ठसंहितायां, नारदसंहितायामक्तम्। तस्य विषये बृहत्संहितायां गर्गवीरभद्रदेवलवसिष्ठादिमतं प्रदर्श्य स्पष्टीकृतम्। राहोरागमविषये भद्रबाहुसंहितायामुक्तम्। राहोराधारेण ग्रहणसम्भवासम्भवनिर्णयं कर्तुं शक्यते। ग्रहणकाले स्थितानां ब्रह्मादिसप्तपर्वेशानां फलसहितं वर्णनं वसिष्ठसंहितायां तथा नारदसंहितायां कथितम्। सप्तपर्वेशानां फलं तथा तदधिपतिविषये नारदसंहितायां कथितम्। वसिष्ठसंहितायां तथा बृहत्संहितायां ग्रहणकालिकराहोर्वर्णस्वरूपाधारेण शुभाशुभज्ञानं तथा च सूर्यचन्द्रयोरुपरि सूर्यादिग्रहाणां दृष्टिफलं विवेचितम्। तथा सूर्यचन्द्रयोर्ग्रहणकाले कार्त्तिकादिमासेषु प्राप्तव्यं शुभाशुभफलं कथितम्। भद्रबाहुसंहितामपि राहोर्वर्णस्वरूपाधारेण शुभाशुभज्ञानं कथितम्। वसिष्ठसंहितायां

सूर्यचन्द्रयोर्दशमोक्षानां नामानि फलानि च कथितानि। नारदसंहितायां ग्रासमोक्षयोर्दशविधभेदानां केवलमुल्लेखोऽस्ति। बृहत्संहितायां सूर्यचन्द्रयोर्ग्रहणे मेषादिराशिगतयोः सूर्यचन्द्रयोर्ग्रासलक्षणं कथितम्। किन्तु तद्विषये किमप्यधिकं विवरणं नास्ति। भद्रबाहुसंहितायां प्रतिपदादिदिनेषु दृश्यमानस्य राहोरुदयस्य शुभाशुभफलं, राहोः कारणेन भवतश्चन्द्रग्रहणस्य फलं तथा च नक्षत्रानुसारेण चन्द्रग्रहणफलं कथितं तस्य वैशिष्ट्यं दर्शयति।

**केतुचाराध्यायः** – केतुचाराध्याये वसिष्ठसंहितायां दशमाध्याये पञ्चाशत् (५०) श्लोकाः सम्मिलिताः। बृहत्संहितायामेकादशाध्याये द्विषष्ठी (६२) श्लोकाः सम्मिलिताः। नारदसंहितायां द्वितीयाध्याये विंशति(२०)श्लोकाः सम्मिलिताः। तथा भद्रबाहुसंहितायामेकविंशत्यध्यायेऽष्टपञ्चाशत्(५८) श्लोकाः सम्मिलिताः।

जगति दिव्यान्तरिक्षभौमास्त्रिविधाः केतवः सन्तीत्युक्त्वा वसिष्ठसंहितायां तेषां फलानि कथितानि। नारदसंहितायां केतोरुदयास्तो गणितेन ज्ञातुं न शक्यत इति स्पष्टयतः केतूनां संख्या च तेषां वर्णनं तथा तस्योदिते फलं कथितम्। बृहत्संहितायां केतूनां संख्याविषय उक्तम्। यथा –

> शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम्।
>
> बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ।।५।।बृ.सं. ११.५

अस्मिन्नध्याये विविधसञ्ज्ञककेतूनां फलं विस्तारेण वर्णितमिति तस्य विशेषः। वसिष्ठसंहितायां अश्विन्यादिनक्षत्रोत्थितस्य केतोः फलं वर्णितमिति तस्य वैशिष्ट्यम्। नारदसंहितायां सूर्यादिग्रहाणोत्पन्नस्य तथा च विविधाकारस्य केतोः फलं कथितमिति तस्य वैशिष्ट्यम्। भद्रबाहुसंहितायामपि विविधाकाराः, विविधभेदाः केतवः, तेषां स्वरूपं तथा च तेषां विशेषफलविषये विवेचितम्।

## १.७.४ वास्तुप्रकरणम् ----

वसिष्ठसंहिताग्रन्थे गृहप्रवेशाध्याय:, वास्त्वध्याय:, सुरप्रतिष्ठाध्याय:-इति त्रयोऽध्याया वर्तन्ते। बृहत्संहिताग्रन्थे वास्तुविद्याध्याय: (अ. ५३), प्रासादलक्षणाध्याय: (अ. ५६), प्रतिमालक्षणाध्याय: (अ. ५८) तथा प्रतिमाप्रतिष्ठाध्याय: (अ.६०)- इत्यादि-अध्याया: वास्तुविषये सन्ति। तत्र वास्तुविद्याध्याये १२५ श्लोका: सम्मिलिता:।

तस्य वैशिष्ट्यम् – नृपादिप्रासादप्रमाणाणि कथितानि। यथा नृप:-सेनापति:-सचिव:-युवराज:-युवराजानुज:-राजमहिषी-विप्रादिचतुर्वर्णानां- एतेषां प्रासादप्रमाणानि गृहप्रमाणानि च निरूपितानि। वसिष्ठसंहिताग्रन्थे तस्योल्लेखो नास्ति। यथा- नृपस्य गृहप्रमाणविषये वसिष्ठसंहितायामुक्तम् –

उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन ।

अष्टाष्टोनान्येव पञ्च सपादानि दैर्घ्येण ।।४।।

चतु:शालापरत्वे सर्वतोभद्र-नन्द्यावर्त-वर्धमान-स्वस्तिक-रुचकवास्तुलक्षणानि, फलानि च वर्णितानि। तथा चान्यशालापरत्वेन विस्तारेण वर्णितम्। एकाशीतिपदे वृत्ते-त्रिभुजे, चतु:षष्टिपदे चतुर्भुजे वास्तुमण्डलविचारो वर्णित:। वसिष्ठसंहिताग्रन्थे केवलमेकाशीतिपदवास्तुमण्डलविचार: प्रदर्शित:। गृहसमीपे वृक्षारोपणं संक्षेपेण वर्णितम्। वसिष्ठसंहिताग्रन्थे विस्तृतरूपेण वर्णितम्। वास्तुपुरुषाङ्गे देवतास्थापनविचारो वसिष्ठसंहिताग्रन्थे न प्रदर्शित:। बृहत्संहिताग्रन्थे वास्तुपुरुषाङ्गे देवतास्थापनविचार: प्रदर्शितस्तस्य वैशिष्ट्यम्। गृहमध्ये गृहोपकरणानां व्यवस्थाविषये केवलमेक: श्लोक: बृहत्संहितायामुक्तम् । किन्तु वसिष्ठसंहितायां नारदसंहितायां च तद्विषये विस्तृतरूपेण विवेचनमस्ति। यथा नारदसंहितायां–

स्नानगारं दिशि प्राच्यामाग्नेय्यां पचनालयम्।

याम्यायां शयनागारं नैऋत्यां शस्त्रमन्दिरम्।।५०।।

एवं कुर्यादिदंस्थानं क्षीरपानाज्यशालिका:।
शय्यामूत्रास्त्रतद्विद्याभोजनामङ्गलाश्रिया:।।५१।।
धान्यस्त्रीभोगवित्तं च शृङ्गारायतनानि च ।
ईशान्यादिक्रमस्तेषां गृहनिर्माणकं शुभम्।।५२।।

अर्थात् पूर्वदिशि स्नानागारं, अग्निकोणे भोजनालयं, दक्षिणे शयनं, नैऋत्ये शस्त्रागारं, ईशानकोणे दुग्ध-जल-घृतपानशाला, अग्निकोणे शय्या, मूत्रं, शस्त्रं तथा भोजनं, नैऋत्यकोणे धान्य-स्त्रीभोगस्तथा धनं तथा च वायव्यकोणे शृङ्गारप्रसाधनस्थाननिर्माणं कर्तव्यम्। नारदसंहितायां उक्तम् - गृहे पश्चिमे, दक्षिणे वा कपाटं स्थापयेत्। यत्तस्य वैशिष्ट्यम्। वसिष्ठसंहितानुसारेण पूर्वदिशायां स्नानागार:, अग्निकोणे भोजनालय:, दक्षिणदिशायां शयनकक्ष:, नैऋत्यकोणे शस्त्रमन्दिरं, पश्चिमदिशायां भोजनगृहं, वायव्यकोणे पशुमन्दिरं, उत्तरदिशायां शृङ्गारादिप्रसाधनं तथैशानकोणे देवमन्दिरमिति गृहमध्ये व्यवस्था कुर्यात्। पूर्वाग्निकोणयोर्मध्ये दधिमन्थनादि:, दक्षिणाग्निकोणयोर्मध्ये रतिमन्दिरं(शृङ्गार-भूविलास:), दक्षिणनैऋत्यकोणयोर्मध्ये पुरीषत्यागमन्दिरं, पश्चिमनैऋत्यकोणयोर्मध्ये विद्याभवनमध्ययनस्य मन्दिरं, पश्चिमवायव्यकोणयोर्मध्ये रुदन-रोदनकक्ष:, उत्तरवायव्यकोणयोर्मध्ये कामोपभोगकक्ष: उत्तरेशान्यकोणयोर्मध्ये चिकित्साकक्ष:, पूर्व-ईशान्यकोणयोर्मध्ये सर्ववस्तुसंग्रहकक्ष:-इत्थं वैशिष्ट्यपूर्णं विवेचनं प्राप्यते। बृहत्संहितायां प्रासादलक्षणाध्याये (अ. ५६) अन्तिमे श्लोके (३१) वराहमिहिरेण कृतो वसिष्ठस्योल्लेख: संप्राप्यते। तेन वसिष्ठस्य प्रभावो दृश्यते।

### १.७.५ **संस्कारप्रकरणम्** —

वसिष्ठसंहितायां आधानाध्याये (अ. २४), अतिविस्तृततया वर्णितमस्ति - तत्र स्त्रीणां रजोदर्शनकाल: कदा भवति? सर्ववनितानां प्रथमरजोदर्शनत:

शुभाशुभफलमश्विन्यादिसप्तविंशतिनक्षत्रानुसारेण तथा च रव्यादिसप्तवारानुसारेण कथितम्। तथा चाशुभतिथियोगेषु प्राप्तेऽनिष्टफलं कथितम्। नारदसंहितायां केवलं पञ्चश्लोकाः सन्ति। तत्र प्रथमश्लोके(अ. १६) उक्तम् – नार्यो रजोदर्शनतो दिनचतुष्टयमस्पृश्याः। ततः शुद्धाक्रियाश्च। अयं विधिः सर्ववर्णासु। एतच्छोकसंदर्भे वैशिष्ट्यं प्रदर्शयता वसिष्ठसंहितायामुक्तम् – नार्यः रजोदर्शनतः प्रथमदिने चाण्डाली, द्वितीयदिने पतिता, तृतीयदिने रजकी तथा चतुर्थदिने शूद्रा स्यात् । तथा पञ्चमे दिने देवपितृकार्यार्थे शुद्धा स्यात्। किन्तु यदि दुष्टवारः स्यात्, तदा नवोदकुम्भसलिलैः समन्त्रितैरौषधैः स्नानं कुर्यात्। नारदसंहितायां सर्ववनितानां प्रथमरजोदर्शनतः शुभाशुभफलं (अ. १५, श्लोक ३४) उक्तम्। प्रथमरजोदर्शनकाले कर्क-वृषभ-धनु-मीन-मिथुन-कन्या-तुलालग्नमुत्तमं स्यात्। यस्योल्लेखो वसिष्ठसंहितायां नास्ति। इदं नारदसंहिताया वैशिष्ट्यम् । आधानलग्ने विषमराशिनवांशे गुरुचन्द्रयोः युते दृष्टे वा, तदा पुत्रप्राप्तिर्भवति। तथा आधानलग्ने विषमनक्षत्रं नवांशे / लग्ने बली गुरुचन्द्रौ, सूर्यो भौमो वा विषमराश्यंशे स्थितः । वसिष्ठसंहिताया वैशिष्ट्यमुक्तम्। नारदसंहितायामुक्तम् — पुत्रमिच्छन् स्त्री- रेवती-मूल-आश्लेषा-मघानक्षत्रेषु समराशिगते तथा स्त्रीग्रहैर्दृष्टश्चन्द्रमास्तदा स्त्रियं न व्रजेत् ।

१. **पुंसवन-सीमन्तोनयनसंस्कारः** - वसिष्ठसंहितायां पुंसवनसीमन्तोनयनसंस्कारः सप्तदशश्लोकेषु वर्णितः। नारदसंहितायां पुंसवनसंस्कारः केवलं १ श्लोकः (अ. १७) तथा च सीमन्तोनयनसंस्कारार्थे केवलं पञ्चश्लोकाः (अ. १८) सम्मिलिताः सन्ति। तत्र कापि विशेषो नास्ति।

२. **जातकर्म-नामकर्मसंस्कारौ** - जातकर्म-नामकर्मसंस्कारार्थे वसिष्ठसंहितायां केवलं चतुःश्लोकाः(अ. २६) सम्मिलिताः। जातकर्मसंस्कारार्थे नारदसंहितायां केवलमेकः श्लोकः(अ. १९), तथा च नामकर्मसंस्कारार्थे चतुःश्लोकाः सम्मिलिताः। वैशिष्ट्यम्

–वसिष्ठसंहितायां पर्व–रिक्तातिथिं वर्जयेत्, मैत्र–मृदु–चर–क्षिप्रनक्षत्राणि शुभानीत्युक्तम् । नारदसंहितायां नक्षत्राणां परत्वे स्थिर–मृदु–चर–क्षिप्रनक्षत्राणि शुभानीति कथ्यते। तिथिविषये कोऽप्युल्लेखो नास्ति।

३. **अन्नप्राशनसंस्कारः** — वसिष्ठसंहितायामन्नप्राशनसंस्कारो दश श्लोकेषु विस्तृतरूपेण वर्णितः। तत्र नक्षत्र–तिथि–वार–ताराबलम्, अन्नप्राशनलग्ने सूर्यादिग्रहाणां द्वादशभावेषु स्थिते शुभाशुभफलं कथितम्। नारदसंहितायामन्नप्राशनसंस्कारे केवलं पञ्चश्लोकाः सन्ति। नारदसंहितायां तिथिक्षयं (दिनक्षयं) त्यजेदित्युक्तम् ।वसिष्ठसंहितायां तस्य विशिष्ट उल्लेखो न दृश्यते।

४. **चौलकर्मसंस्कारः** - वसिष्ठसंहितायां चौलकर्मसंस्कारे द्वादशश्लोकाः। तत्र श्लोके ८- सर्वेषामेव वर्णानां चौलसंस्कारस्य महत्त्वं प्रदर्शितम्। श्लोकोऽयं मुहूर्तचिन्तामणिग्रन्थे वर्तते। नारदसंहितायां चौलकर्मसंस्कार अष्टौ श्लोकाः सम्मिलिताः।

५. **उपनयनाध्यायः** — वसिष्ठसंहितायामुपनयनसंस्कारार्थे ७९ श्लोकाः सम्मिलिताः। नारदसंहितायां केवलं ३५ श्लोकाः समाहिताः। वसिष्ठसंहितायामेकोनचतुर्विंशतिश्लोके भारद्वाजादिश्रेष्ठमुनीनां मतं प्रदश्योक्तम् – चैत्रवैशाखयोः शुक्लपक्षे तृतीया, माघे शुक्लपक्षे सप्तमीतिथिस्तथा फाल्गुनमासे कृष्णपक्षे तृतीया तिथिः- एतेषु यज्ञोपवीतसंस्कारः सर्वथा शुभावहः कथ्यते। नारदसंहितायामुपनयनाध्याये सप्तमश्लोक उपनयनार्थे मासपरत्वेन फलमुक्तम् । यथा वैशाख उपनीत बालो धनवान्, वेदशास्त्रज्ञस्तथा वेदविशारदो भवेत्। ज्येष्ठमास उपनीतबालो विधिवेत्ता तथा बलशाली स्यात्। नारदसंहितायामुपनयनाध्यायानन्तरं छुरिकाबन्धनाध्याये, पञ्चविंशत्यध्याये १२ श्लोकाः सम्मिलिताः। यस्य वसिष्ठसंहितायां कोऽप्युल्लेखो नास्ति। इदं नारदसंहिताया वैशिष्टयम्।

नारदसंहितायां छुरिकाबन्धनाध्याये उक्तम् —

नृपाणां विवाहात्पूर्वं छुरिकाबन्धनसंस्कारं कुर्यात्। शुभमुहूर्तेषु देवतानां समीपे क्षुरिकामर्चयेत् । सुलग्ने, लक्षणसंयुतां तां कट्यां बध्नीयात्। इत्युक्त्वा छुरिकानिर्माणे ध्वजादि–आयवशात् शुभाशुभफलं कथितम्।

६. **समावर्तनसंस्कारः** –समावर्तनसंस्कारे नारदसंहितामेवं वसिष्ठसंहितायां त्रयस्त्रयः श्लोकाः सन्ति। नारदसंहितायां वैशिष्ट्यम् – समावर्तनसम्बन्धो गृहे गमनागमनरूपः स्यात्। अतो गृहप्रवेश उल्लेखितः नक्षत्रवारलग्नलग्ननवांशादिविचारः समावर्तनसंस्कारे शुभः कथ्यते। वसिष्ठसंहितायां स्नातककर्म श्रेष्ठमित्युक्तम् ।

७. **विवाहाप्रश्नाध्याय** : – वसिष्टसंहिताया विवाहप्रश्ननामक एकत्रिंशदध्यायेऽष्टश्लोकाः सम्मिलिताः। नारदसंहितायां सप्तविंशत्यध्याये चतुर्दशश्लोकाः सम्मिलिताः। नारदसंहितायां सर्वाश्रमाणामाश्रयो गृहस्थाश्रम उत्तम इत्युक्त्वा विवाहसंस्कारस्य महत्त्वं प्रदर्शितम्। तत्र विवाहप्रश्नलग्नाधारेण शुभाशुभफलनिर्णयः कथितः। नारदसंहितायामेवं वसिष्ठसंहितायामुक्तम् — लग्ने स्थितः चन्द्रमसस्तथा च सप्तमे स्थितस्य भौमस्य कारणेनाष्टमेऽब्दे भर्तृमरणमवश्यं भवेत्। अत्र किञ्चिद् भेदो नारदसंहितायां भर्तृमरणमित्युल्लेखः, किन्तु वसिष्ठसंहितायां वरस्य वाङ्गनाया वा मृत्युमादिशेदित्युक्तम्।

८. **विवाहसंस्कारः** – विवाहसंस्कारार्थे वसिष्ठसंहितायां द्वात्रिंशदध्याये चतुश्चत्वारिंशदधिकद्विशतं (२४४)श्लोकाः सम्मिलिताः। नारदसंहितायामेकोनत्रिंशदध्याये शताधिकत्रिषष्ठी (१६३) श्लोकाः सम्मिलिताः। वसिष्ठसंहिताया वैशिष्ट्यम् — विवाहमेलापकेऽष्टादशकूटानां विचारः प्रदर्शितः। यथा (१) वर्णकूटम् (२) गणकूटम् (३) माहेन्द्रकूटम् (४) स्त्रीदीर्घत्वम् (५) योनिकूटम् (६) राशिकूटम् (७) राश्यधिपः (सूर्यादिग्रहाणां नैसर्गिकमैत्रीविचारः) (८) वश्यम् (९) नाडीकूटम् (१०)

वेधकूटम् (११) भूतकूटम् (१२)लिङ्गम् (१३) विजातिकूटम् (१४) गोत्रम् (१५) पक्षीकूटम् (१६) आयकूटम् (१७) योगिनीकूटम् (१८) सुधांशयुजः– एतेषामष्टादशकूटानां विचारः प्रदर्शितः।

(१) वेधकूटे वैशिष्ट्यम् – नक्षत्राणां परत्वे अश्विनी–पूर्वा, रेवती–मघा, पूर्वाफाल्गुनी–उत्तराभाद्रपदा, भरणी–अनुराधा, कृत्तिका–विशाखा, स्वाती–शतभिषा, मृगशीर्षम्–उत्तराषाढा, चित्रा–पूर्वाभाद्रपदा, आर्द्रा–श्रवणम्, उत्तराषाढा–हस्तम्, पुष्यम्–स्वाती, मूलम्–आश्लेषा, शतभिषा–आश्लेषा, ज्येष्ठा–उत्तराफाल्गुनी – एतेयोर्द्वयोर्द्वयोर्नक्षत्रयोर्मध्ये वैरम्- अतो विवाहे त्याज्यम्।

(२) अश्विनीनक्षत्रतो रेवतीनक्षत्रपर्यन्तं – २७ नक्षत्राणां पञ्च पञ्च गणाः, पृथ्वी–जलम्–अग्निः–वायुस्तथाकाशसंज्ञकाः स्युः। जलाग्न्ययोर्मध्ये वैरमतो विवाहे त्याज्यम्। तद्यथा –

| | | | | | |
|---|---|---|---|---|---|
| अश्विनी– | पृथ्वी | भरणी – | जलम् | कृत्तिका – | अग्निः |
| रोहिणी – | वायुः | मृगशीर्षम् – | आकाशम् | आर्द्रा – | पृथ्वी |
| पुनर्वसु – | जलम् | पुष्यम् – | अग्निः | आश्लेषा – | वायुः |
| मघा – | आकाशम् | पूर्वाफा.– | पृथ्वी | उत्तराफा.– | जलम् |
| हस्तम् – | अग्निः | चित्रा – | वायुः | स्वाती – | आकाशम् |
| विशाखा – | पृथ्वी | अनुराधा – | जलम् | ज्येष्ठा – | अग्निः |
| मूलम् – | वायुः | पूर्वाषाढा – | आकाशम् | उत्तराषाढा – | पृथ्वी |
| श्रवणम् – | जलम् | धनिष्ठा – | अग्निः | शतभिषा– | वायुः |
| पूर्वाभा. – | आकाशम् | उत्तराभा.– | पृथ्वी | रेवती – | जलम् |

(३) वरकन्ययोर्नक्षत्रलिङ्गं समानं, तदाधिका प्रीतिस्तथा विपरीतलिङ्गे युद्धं भवति। इदं विवाहमेलापकविचारे वसिष्ठस्य वैशिष्ट्यम्।

(४) जातिकूटविचारेऽश्विन्यादिनक्षत्रतो रेवतीनक्षत्रपर्यन्तं ब्राह्मणादिक्रमेण ब्राह्मण-क्षत्रिय-वैश्यशूद्राः, संकरजास्तथा जातिप्रभेदाः। एते षड्भेदा ब्राह्मणादिक्रमेण ज्ञेयाः। नृनार्योरेकजात्यामतुला प्रीतिः स्यात्।

(५) माहेन्द्रकूटविचारः - वधूनक्षत्रतो वरनक्षत्रं यदि १, ४, १०, १३, १६, १८, २२, तथा २५ क्रमे भवति, तदा नृनार्योर्मध्येऽत्यन्तप्रीतिर्भवेत् ।

(६) पुंजातितो हीनकुला स्त्री समा, स्त्रीजातितो हीनकुलः पुंमान् श्रेष्ठः, किन्तु विलोमजात्यामपि तीव्रवैरं स्यात्।

(७) गोत्रविचारे भचतुष्टयेन, अश्विन्यादिनक्षत्रक्रमेण सप्तगोत्रा मरीचि-वसिष्ठ-महाङ्गिरा-अत्रि-पौलस्ति-पुलह-क्रतुनामकाः ख्याताः। नृनार्योर्विवाह एकगोत्रेऽप्रीतिः, भिन्नगोत्रे प्रीतिवृद्धिः स्यात्।

(८) आयकूटविचारे ध्वजादि-आयानामश्विन्यादिक्रमेणाष्टभिः पुनः पुनर्भाजिताः स्युः। तत्र त्रैवर्णिकं भत्रितयं युक्तम्, किन्तु पञ्चमेऽन्योन्यं शत्रवः स्युः।

(९) योगिनीकूटविचारे ब्रह्माणी-आदिषु अष्टसु योगिनीषु त्रैवर्णिकं भत्रितयं योग्यम्,

किन्तु पञ्चमं अन्योन्यशत्रुरूपं स्यात्। योगिन्यैक्ये शुभमन्यथा अशुभं स्यात्। सर्ववर्णानां कृते विवाहमेलापके योगिनीविचारं कुर्यात्।

(१०) **पक्षिकूटम्**— भेरुण्ड-पिङ्गलक-काक-कुक्कुट-मयूर- एते पञ्च गणाः अश्विन्यादिनक्षत्रक्रमेण कथिताः। बाण-ऋतु-षट्-शर-शरैः क्रमशो विवाहे शुभदायकाः स्युः।

भिन्नगणे कलहस्तथैकगणे वृद्धिः स्यात्।[४०३]

(११) सुधांशयुजोकूटं — अश्विन्यादिनक्षत्राणां क्रमेणाष्टभिश्च ज्ञात्वा वरकन्ययोर्दिक्स्वामिनः ग्रहाधिपस्तथा तिथिस्वामिनो ज्ञेयाः। तत्र तयोर्मित्रत्वे मित्रता, शत्रुत्वे शत्रुत्वं ज्ञेयम्।

एतत्प्रकारेण विवाहे दैवज्ञोऽष्टादशवर्गविचारं सम्यग्ज्ञात्वा विवाहपरत्वे निर्णयं कारयेत्। ग्रह-मित्रग्रहविचारः सदैव ब्राह्मणवर्णानां कृते, ग्रहसंज्ञकविचारः क्षत्रियवर्णानां कृते, स्त्रीदूरविचारो वैश्यानां कृते तथा च योनिवर्गविचारः शूद्राणां कृते करणीयः। राशिकूटं तथा तस्य स्वामिनः मैत्रीविचारः, स्त्रीदूरत्वं, गणः, योनिः, नाडी, संयोगस्तथा वरगोत्रम्-इत्यादिकूटानां विचारं विवाहेऽवश्यं परिचिन्तयेत्।

वसिष्ठसंहितायां विवाहमेलापके उपर्युक्तकूटानां विचारास्तस्य वैशिष्ट्यं प्रकटयति।

वसिष्ठसंहितायां गोधूलिसंज्ञकलग्नं सर्ववर्णानां सर्वदेशेषु योग्यं स्मृतम्। गोधूलिविवाहो गान्धर्वविवाहे वैश्यविवाहेऽपि योजयेत् ,सर्वदोषान् निहन्ति यथा हरिरित्यक्षरद्वयम्। नारदसंहितायां गोधूलिसंज्ञकलग्नं प्राच्यानां कलिङ्गानां च मुख्यं स्मृतम्। अभिजित्संज्ञकं सर्वदेशेषु मुख्यदोषाणां विनाशकृत् स्यात्। बृहत्संहितायां संस्कारप्रकरणे १०३ अध्याये, विवाहपटले १३ श्लोकाः सम्मिलिताः। तत्र विवाहलग्ने द्वादशभावेषु स्थितानां सूर्यादिग्रहाणां फलं कथितम्। त्रयोदशश्लोके गोधूलिसंज्ञकलग्नमहत्त्वं प्रदर्शितम्। उक्तं च-

यथा गोपैर्यष्ट्याहतानां खुरपुटदलिता या तु धूलिर्दिनान्ते
सोद्वाहे सुन्दरीणां विपुलधनसुतारोग्यसौभाग्यकर्त्री।
तस्मिन्काले न चर्क्षं न च तिथिकरणं नैव लग्नं च योगः
ख्यातः पुंसां सुखार्थं शमयति दुरितान्युत्थितं गोरजस्तु ।।१३।।

बृ.सं.१०३.१३

---

४०३ व.सं. अ.३२ श्लो. २१४

अन्य: कोऽपि संस्कारविषये बृहत्संहितायामुल्लेखो नास्ति । भद्रबाहुसंहितायां संस्कारप्रकरणे कस्यापि संस्कारस्य विषय उल्लेखो नास्ति।

### १.७. ६ पञ्चाङ्गप्रकरणम् —-

पञ्चाङ्गे तिथि-वार-नक्षत्र-योग-करणाणि- एतेषां पञ्च अङ्गानां समावेशो भवति।

### १. तिथिविचार: —-

वसिष्ठसंहितायां तिथिस्वामिन: परत्वे पुराणदृष्ट्या द्वौ श्लोकौ कथितौ। इदं तस्य वैशिष्ट्यं दर्शयति। इदं बृहत्संहितायां नारदसंहितायां च केवलं एकस्मिन् श्लोके कथितम्। तत्र नारदसंहितायां पुराणोक्ततिथिस्वामिनो विषय उल्लेखोऽस्ति। वसिष्ठसंहितायां तिथिस्वामिनो विषय उक्तम् -

दिनाधिपा धातृविधातृविष्णुयमेन्दुषडवक्त्रशचीश्वराश्च।

वस्वाख्यनागौ परतश्च धर्मशिवार्ककामा: किल विश्वसंज्ञो।।१।। व.सं. अ.१२ श्लो.१

बृहत्संहितायां तिथिस्वामिनो विषय उक्तम् । यथा –

कमलजविधातृहरियमशशाङ्कषडवक्त्रशक्रवसुभुजगा:।

धर्मेशसवितृमन्मथकलयो विश्वे च तिथिपतय:।।१।।

पितरोऽमावस्यायां संज्ञा सदशाश्च तै: क्रिया: कार्या:। बृ.सं. अ. ९९श्लो.१,२

वसिष्ठसंहिताधारेण पुराणदृष्ट्या तिथिस्वामिनो यथा—

वह्निर्विधाताऽद्रिसुता गणेश: सर्प: कुमारो दिनपो महेश:।

दुर्गा यमो विश्वहरी च काम: शिवो निशीशश्च पुराणदृष्ट:।।३।।

व.सं. अ.१२श्लो.३

नारदसंहिताधारेण पुराणदृष्ट्या तिथिस्वामिनो यथा —

वह्निर्विरञ्चिर्गिरिजा गणेशः फणी विशाखो दिनकृन्महेशः।

दुर्गान्तको विष्णुहरी स्मरश्च शर्वः शशी चेति पुराणदृष्टः।।१।।

ना.सं. अ.४श्लो.१

तिथिविषये शुद्धा, विद्धा, क्षयतिथिः, वृद्धितिथिः– इत्यादिनिर्णयो वसिष्ठसंहितायां कथितः।

एतद्विषये नारदसंहितायामुक्तम् –

एकस्मिन्वासरे तिस्रस्तिथयः स्युः क्षयतिथिः।

तिथिर्वारत्रयेष्वेका त्वधिकात्यन्तनिन्दिता।।३६।। ना.सं. अ.४ श्लो.३६

सूर्यास्तमनपर्यन्तं यस्मिनवारेऽपि या तिथिः।

विद्यते सा त्वखण्डा स्यादूना चेत्खण्डसंज्ञिता ।।३७।।ना.सं. अ.४ श्लो.३७

वसिष्ठसंहितायां तिथिमासनक्षत्रर्योयोगेन करणीयं कर्म, तस्य फलानि च एतद्विषये वर्णितम्। यत् तस्य वैशिष्ट्यं प्रकटयति। यथा —

वत्सरं तप्यते पुण्यं तपसः कार्त्तिके लभेत् ।

कार्त्तिके तपसः पुण्यं लभते भीष्मपञ्चके।।६५।।व.सं. अ.१२ श्लो.६५

एतत्प्रकारेण तिथिस्वरूपाध्याये विविधप्रकारेण वैशिष्ट्यं प्रदर्शितम्।

नारदसंहितायां तिथिलक्षणविषये, चतुर्थाध्याये केवलं ३८ श्लोकाः सम्मिलिताः।

बृहत्संहितायामतिसंक्षेपेण केवलं त्रिषु श्लोकेषु वर्णितमस्ति।

भद्रबाहुसंहितायां पञ्चाङ्गपरत्वे कोऽप्युल्लेखो नास्ति।

## २. **करणाध्यायः –**

बवादिकरणानां (चरस्थिरादि) अधिपविषये वसिष्ठसंहिता, बृहत्संहिता तथा च नारदसंहिताग्रन्थेषु वर्णनं वर्तते।

नारदसंहितायामष्टमाध्याये करणविषये केवलं चत्वार: श्लोका: संकलिता:। केवलं करणाधिपा:, शुभाशुभकरणानि, एवं भद्राविषये संक्षेपेण कथितम्। बृहत्संहितामष्टश्लोका: सम्मिलिता:। अध्याये संस्कारप्रकरणे कर्णवेधविषय एवं विवाहपटलविषये संक्षेपेणोक्तम् । तद् वसिष्ठसंहितायां च नारदसंहितायां संस्कारप्रकरणान्तर्गतेषु स्वतंत्राध्यायेषु विस्तृतरूपेण वर्णितमस्ति।

वसिष्ठसंहितायां बवादिकरणेषु कस्मिन्कार्याणि कर्तव्यानीति कथितम्। भद्राविषये सविस्तरं वर्णनं तस्य वैशिष्ट्यं प्रकटयति।

**३. नक्षत्राध्याय: ––**

वसिष्ठसंहिताया नक्षत्राणां स्वामिनो विषये ये श्लोका: सन्ति, ते श्लोका मुहूर्तचिन्तामणिग्रन्थे समुद्धृता: सन्ति। शुभफलप्राप्ति: बीजवपनम्, विद्यारम्भ:, जलाशयारम्भ:- इत्यादिषु विविधेषु कार्येषु ग्राह्यनक्षत्राणां विषये विस्तारपूर्वकं वर्णितं वसिष्ठेन।

नक्षत्रवारयो: परत्वेन कथितानि कार्याणि तथा चाश्विन्यादिनक्षत्राणामाकारा विषये विवेचनं वसिष्ठसंहिताया वैशिष्ट्यम्। बृहत्संहिता तथा नारदसंहितायामश्विन्यादिनक्षत्राणां तारकाणां संख्या प्रदर्शिता। - इति तयोर्वैशिष्ट्यम्। बृहत्संहितायां नक्षत्रजातकाध्याये, स्वतंत्ररूपेण जातकस्याश्विन्यादिनक्षत्रगतं शुभाशुभफलं वर्णितम्। बृहत्संहितायां नक्षत्राध्याये क्षौरकर्म, नामकरणादिसंस्कारविषये नक्षत्रदृष्ट्या विवेचितम्। किन्त्विदं वसिष्ठसंहितायामेवं नारदसंहितायां संस्कारप्रकरणान्तर्गतेषु स्वतन्त्राध्यायेषु विवर्णितम्। नारदसंहितायां नक्षत्राध्यायेऽश्विन्यादिनक्षत्राणां वृक्षाणां नामानि कथितानीति तस्य वैशिष्ट्यं प्रदर्शयति।

**४. वारस्वरूपाध्याय: —-**

वसिष्ठसंहितायां वारस्वरूपाध्याये, त्रयोदशे विंशतिश्लोका: सम्मिलिता:। नारदसंहितायां वारस्वरूपाध्याये पंचमे विंशति: श्लोका: सम्मिलिता:। वसिष्ठसंहितायां वारपरत्वेन नवाम्बरवस्त्रधारणफलं वर्णितमिति तस्य वैशिष्टयम्। नवाम्बरवस्त्रधारणविषये स्वतंत्राध्याय: (अ. ४४) कथित:। बृहत्संहितायां वराहमिहिरेण वारस्वरूपाविषये वर्णितं नास्ति।

**५. योगाध्याय: —-**

वसिष्ठसंहितायां योगाध्याये (अ. १५) एकचत्वारिंशत् श्लोका: सम्मिलिता:। तत्र वर्णिता: सर्वे विषया नारदसंहितायां दृश्यन्ते। तत्र किमपि वैशिष्ट्यं नास्ति। बृहत्संहितायां वराहमिहिरेण योगाध्यायविषये तस्य विचारो न प्रदर्शित:। भद्रबाहुसंहितायामपि योगाध्यायविषये कोऽप्युल्लेखो नास्ति।

**१.७.७ अश्वारिष्टशान्त्यध्याय: —-**

वसिष्ठसंहितायां अश्वारिष्टशान्तिविषयके, चतु:त्रिंशदध्याये त्रयोविंशतिश्लोका: सम्मिलिता:। तत्रत्यश्लोकसंख्या तथा च नारदसंहिताया: श्लोकसंख्या (अ. ५४, श्लोकसंख्या २३) समानास्ति। सर्वे विषया: समाना: सन्ति। तथा चाधिकांशश्लोका अपि समाना: सन्ति। बृहत्संहितायां वराहमिहिरेण (अ. ६६, श्लोकसं. ५) अश्वलक्षणाध्याये अश्वलक्षणविषय उक्तम्।

### १.७.८ गजारिष्टशान्त्यध्यायः —-

वसिष्ठसंहितायां (अ. ३५, श्लोकसंख्या ४६), वर्णिता गजारिष्टशान्तिविषये नारदसंहितायां कोऽप्युल्लेखो नास्ति। वराहमिहिरेण तस्य बृहत्संहिताग्रन्थे हस्तिलक्षणाध्याये गजानां लक्षणविषये अष्टौ श्लोकाः सम्मिलिताः।

### १.७.९ उत्पाताध्यायः —-

वसिष्ठसंहितायामुत्पाताध्याये पञ्चचत्वारिंशदध्याये शताधिकत्रयनवति(१९३)श्लोकाः सम्मिलिताः। बृहत्संहितायां षट्चत्वारिंशदध्याये अष्टनवति(९८)श्लोकाः सम्मिलिताः। मनुष्याणामपचारेण, अविनयनेन, अधर्मेण, असत्येन, नास्तिक्यात्, अतिलोभतः, नृणामनाचारेण नित्यमुपद्रवाः प्रजायन्ते। नृणां पापसञ्चयाद् दिव्यान्तरिक्षभौमा उत्पाता भवन्ति। अतस्तत्प्रतिघाताय राष्ट्रस्य शान्त्यर्थे नृपः शान्तिकर्म कारयेत्। इत्थं वसिष्ठसंहितायां तथा बृहत्संहितायामुक्तम्। नृपः पुरे, जनपदे, कोशे, वाहनेषु, पुरोहिते स्त्रीपुत्रात्मनि – एतैरष्टभिर्दैवोत्पातद्वारा पीडितो भवति। अतस्तस्मात् शान्तिकर्म कर्तव्यम्। अध्यायेऽस्मिन् विधिपुरःसरं, विस्तारेण, सविशदं शान्तिकर्माधिदेवताप्रत्यधिदेवतानां मन्त्रैः, जपदानादिसहितं कथितम्। इदं वसिष्ठसंहिताया वैशिष्ट्यम्। बृहत्संहितायां शान्तिकर्मविधानं नोक्तम्। विविधोत्पातानां लक्षणफलानि कथितानि। शान्त्यर्थे कर्म कथितम्। यथा –

अनिमित्तभङ्गचलनस्वेदाश्रु निपातजल्पनाद्यानि
लिङ्गार्चायतनानां नाशाय नरेशदेशानाम्।।८।।बृ.सं. अ.४६ श्लो.८

विकृतवस्तुविषये फलमुक्त्वा शान्त्यर्थे शान्तिविधानं वर्णितम्। दैवविकारं ज्ञात्वा पवित्रः, संयतः, स्नातः कुसुमानुलेपनवस्त्रैस्तत्प्रतिमां विधिवत्पूजयेत्। बलिं दत्त्वा स्थालीपाकं तल्लिङ्गैर्मन्त्रैश्च विधिवज्जुहुयात्।

एतत्प्रकारेणाग्निवैकृतं, वृक्षवैकृतं सस्यवैकृतं, वृष्टिवैकृतं, जलवैकृतं, चतुष्पदवैकृतं, वायव्यवैकृतं, मृगपक्ष्यादिवैकृतं, शक्रध्वजेन्द्रकीलादिवैकृतम्– एवमादिनामुत्पातानां लक्षणानि फलानि च कथितानि। तथा तेषां शान्तकर्म विहितम्। नारदसंहितायां तथा भद्रबाहुसंहितायामुत्पातविषये कोऽप्युल्लेखो नास्ति।

## १.७.१० **यात्राध्यायः** —-

वसिष्ठसंहितायां यात्राविषये सप्तत्रिंशदध्याये २३३ श्लोकाः सम्मिलिताः। अयं विषयो नारदसंहितायां यात्राप्रकरणे ९३ श्लोकैर्वर्णितः।

पर–सामान्ययोर्द्विविधयोर्यात्रयोः संदर्भे निर्णीतं यत् कथितविशिष्टतिथिवारनक्षत्रयोगेषु सामान्या तथा कथितविशिष्टयोगलग्नराजयोगेषु समराह्वया यात्रा शुभा स्यात्। एवं वसिष्ठसंहितायामुक्तम्।

नारदसंहितायां यात्राप्रयाणे शुभयात्राहेतोः शुभतिथिनक्षत्रवाराद्युक्तम्। यात्रालग्नकाले स्थितानां सूर्यादिग्रहाणां परत्वे शुभाशुभनिर्णयोऽपि कथितः। यात्राप्रयाणे शकुनविचारोऽपि प्रदर्शितः। बृहत्संहितायां तथा भद्रबाहुसंहितायां यात्राविषय उल्लेखो नास्ति। योगयात्रानामको वराहस्य स्वतन्त्रो ग्रन्थो विद्यते।

## १.७.११ **वस्त्रपरिधानाध्यायः** —-

वसिष्ठसंहितायां वस्त्रपरिधानविषये चतुश्चत्वारिंशदध्याये त्रयोदश(१३) श्लोकाः सम्मिलिताः। बृहत्संहितायां वस्त्रच्छेदनलक्षणाध्याय एकसप्ततितमे चतुर्दश (१४)श्लोकाः

सन्ति। अध्यायेऽस्मिन्नश्विन्यादिसप्तविंशतिनक्षत्रेषु नवाम्बरधृतिफलमुक्तम्। वसिष्ठसंहितायां रव्यादिवारेषु नवाम्बरधृतिफलमुक्तम्। बृहत्संहितायां नवधाकृतवस्त्रद्वारा वस्त्रछेदने शुभाशुभफलं कथितमिति तस्य वैशिष्ट्यम्। नारदसंहितायां तथा भद्रबाहुसंहितायां वस्त्रपरिधानविषय उल्लेखो नास्ति।